International Journal of Multidisciplinary Horizon

ISSN:3049-2017
IJMH 2025; 2(6): 229-234
© 2025 IJMH
www.themultijournal.com
Received: 13-12-2025
Accepted: 27-12-2025
Publish : 30-12-2025

**Dr. P.T.G.Ranga Ramanujacharyulu,**
Assistant Professor , Dept. of Agama,
National Sanskrit University,
Tirupati-A.P.

**Correspondence:**
**Dr. P.T.G.Ranga Ramanujacharyulu,**
Assistant Professor , Dept. of Agama,
National Sanskrit University,
Tirupati-A.P.

# संस्कृतक्षेत्रे आचार्य श्रीमद्भागवतं रघुनाथाचार्याणां योगदानम्

**Dr. P.T.G.Ranga Ramanujacharyulu**

**श्रीवेङ्कटाद्रिनिलयः कमलाकामुकः पुमान्।**
**अभङ्गुरविभूतिर्नः स्तरङ्गयतु मङ्गळम्।।**

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा इत्याभाणकमनुसृत्य कृत्स्ने प्रपञ्चे भारतदेश-स्यौन्नत्यं केवलं संस्कृतभाषा तथा संस्कृतशास्त्राणामभिवृध्यर्थञ्च देशे प्रत्येकस्मिन् राज्ये कोणे कोणे प्रकाशमानाः सहस्राधिकाः महान्तः विद्वद्वौरेया आविर्बभूवुः। ते सर्वे निजपाण्डित्येन नित्यानुष्ठाना-चरणेन च विभिन्नशास्त्रेषु कृतभूरिपरिश्रमाः समजायन्त।क्रमेस्मिन् विशिष्यान्ध्रदेशे बहवः पण्डिताः स्वशास्त्रपाण्डित्येनाजीवनं संस्कृतभाषायाः तथा कतिपयशास्त्राणां प्रकाशनमकार्षुः। तेषु सुप्रसिद्धाः प्रातःस्मरणीयाः न्यायमीमांसाविशिष्टाद्वैतवेदान्तवेदागमसाहित्यादिशास्त्रेषु महान्तः निष्णाताःतथैव विशिष्टप्रशासनदुरन्धराः संस्कृतान्ध्राङ्ग्लभाषासु कतिपयग्रन्थकर्तारः श्रीवैष्णवसम्प्रदाय-नैष्ठिकाः आचार्य श्रीमद्भागवतं रघुनाथाचार्याः अवश्यमनुसन्धेयाः।

दक्षिणभारतदेशे समैक्यान्ध्रदेशे कृष्णानदीतीरे गर्तपुरी(Guntur) पट्टणपरिसरप्रान्तेषु विजय-वाडा, मचिलीपट्टणप्रान्तेषु च श्रीवैष्णवसम्प्रदायः विशेषरूपेण प्रचारे आसीत्। तत्रापि दाक्षिणात्याः (तॆङ्गळै) औत्तराहिणः(वडगळै)इति सम्प्रदाये द्वैविध्यं विद्यते। विशिष्य दाक्षिणात्येषु काण्डूरु-वंशीयाः-गुदिमॆळ्ळवंशीयाः-मरिंगण्डिवंशीयाः-नल्लान्चक्रवर्तुल-करि-उत्पल-रेजेटि-श्रीमत्तिरुमल -गुदिमॆळ्ळ-कन्दाड-धनकुधरम्-श्रीभाष्यं-श्रीमद्भागवतंवंशीयाः मुख्याः।सर्वे शताधिकवर्षेभ्यः प्रागेव आन्ध्रदेशे विभिन्नशाखासु विभिन्नमण्डलेषु च परम्परया स्वबन्धुजनपरिवारसमूहैः विद्योतन्ते। तेषु श्रीमद्भागवतंवंशीयाः चतुश्शतवर्षेभ्यः गुण्टूरपट्टणे तत्परिसरप्रान्तेषु ग्रामेषु च निवसन्ते। विशिष्य ते पाञ्चरात्रदाक्षिणात्यशाखीयाः आन्ध्रश्रीवैष्णवसमाजे सुप्रसिद्धा इति विराजन्ते। तेषु कौण्डिन्यस-गोत्रीयाः श्रीमद्भागवतं लक्ष्मीनरसिंहाचार्याः विशिष्टवैष्णवपाञ्चरात्रविद्वांसः विराजन्ते। ते विशिष्य विशिष्टाद्वैतवेदान्तन्यायवेदपाञ्चरात्रादिशास्त्रेषु तथा श्रीवैष्णवसम्परदायानुष्ठाने च कृतभूरिपरिश्रमा इति प्रसिद्धाः। आचार्य श्रीमद्भागवतं रघुनाथाचार्या आन्ध्रदेशे गुण्टूरुशाखायां रेपल्लेमण्डलस्थ रावि अनन्तवरं ग्रामे आचार्य श्रीमद्भागवतं लक्ष्मीनरसिंहचार्यवेङ्कटलक्ष्मीपुण्यदम्पत्योः साधारणनाम-संवत्सरे पुष्यमासे 1-1-1944 दिनाङ्के प्रथमपुत्रत्वेन जन्म लेभिरे। अन्ये त्रयः श्रीनिवासाचार्यः, श्रीनिवासभट्टार्यः, शाङ्र्गपाणिभट्टाचार्यश्चेति अनुजकल्पाः समजायन्त। बाल्यात्प्रभृतिसुस्निग्धः इति श्रीमद्रामायणे उक्तरीत्या श्रीरघुनाथाचार्याः पितृपादानां सन्निधौ नैकान् शास्त्रीयविशेषानध्यगच्छन्। हेतुनानेन तेऽत्यन्तं कुशाग्रबुद्धयः समभूवन्। बाल्ये गुण्टूरनगरे दशमी कक्ष्यानन्तरं आन्ध्रदेशस्य कृष्णाशाखायां मचिलीपट्टणस्य समीपे विराजमाने चिट्टिगूडूरुग्रामे विराजमानायां श्रीनारसिंहसंस्कृत -कळाशालायां साहित्यविभागे विद्याप्रवाणाकक्ष्यामध्यगच्छन्। पितृचरणानां पितामहस्याशीर्भिः वैदिकशास्त्रीयविषयेषु तथा बह्वीषु भाषासु प्रावीण्यमप्यलभन्त। हिन्दीसंस्कृताङ्ग्लकन्नडतमिळादिषु एवं जर्मन् फ्रान्सभाषासु निपुणाः। संस्कृतान्ध्राङ्गलहिन्द्यादिषु नैकान् व्यासान् व्यलिखन्। हयग्रीवोपासकाः श्रीमन्तः रधुनाथाचार्याः पठनकाले एव ग्रन्थरचनां प्रारम्भमकुर्वन्। श्रीनारसिंह -संस्कृतकळाशाला चिट्टिगूडूरुग्रामे तदानीन्तनसर्वकारसहायेन संस्कृतसाहित्यव्याकरणन्यायमीमांसा -विशिष्टाद्वैतवेदान्तादिशास्त्रेषु कृतभूरिपरिश्रमेभ्यः श्रीवैष्णवानुष्ठान-दुरन्धरेभ्यः प्रातःस्मरणीयेभ्यः पद्मविभूषणकलाप्रपूर्णेत्यादिविध-बिरुदाङ्कितेभ्यः श्रीमत्तिरुमलगुदिमॆल्ल वरदाचार्यमहोदयेभ्यः प्रवर्तिता। तत्रैव रघुनाथाचार्याणां रचनावैदुष्यमवर्धत।

1968वर्षे प्रसिद्धपुण्यक्षेत्रं तिरुपतिं समेत्य श्रीवेङ्कटेश्वरप्राच्यकळाशालायां (**SriVenkate -swara Oriental College**)न्यायशास्त्रे अध्यापकपदमलञ्चक्रुः। 1975वर्षे श्रीवेङ्कटेश्वरविश्व- विद्यालये **M.A. (Sanskrit)**इत्युपाधिं प्रापुः। तिरुपतिस्थसुप्रसिद्धकेन्द्रियसंस्कृतविद्यापीठे सुप्रसिद्ध पण्डितानामाचार्याणां मल्लादिदक्षिणामूर्तिबालसुब्रमण्यमहोदयानां मार्गदर्शने शास्त्ररत्नाकरः न्याय -वाचस्पतिः महामहोपा-

ध्यायः पद्मविभूषणेत्यादिबिरुदाङ्किताननामाचार्यनावल्पाक्कंशठकोप-रामानुज- ताताचार्याणामाशीर्भिः **न्यायमीमांसादर्शनयोः प्रमाण-विचारः** इति विषये विद्यावारिधिः(**Ph.D.**) उपाधिं लेभिरे। श्रीवेङ्कटेश्वरविश्वरविद्यालये संस्कृतविभागे सप्तवर्षाणि वरिष्ठा-ध्यापकपदम्, 1983 तमे वर्षे प्रवाचकपदम् 1989वर्षे आचार्य(**Professor**) पदञ्चालञ्चक्रुः।

आचार्यपदव्यां पञ्चवर्षाणि कार्यं निर्वाह्य **1994** तमे वर्षे भगवतः श्रीवेङ्कटेश्वरस्वामिनःपरिपूर्णानुग्रहेण सुप्रसिद्धस्य तिरुपतिस्थराष्ट्रिय-संस्कृतविद्यापीठस्य **द्वितीयकुलपतित्वेन** (**Vice-Chancellor**) भारतसर्वकारेण नियुक्ताः। तेषां कुलपतित्वसमये विद्यापीठस्य स्वर्णयुग इति सर्वैः समुद्घोषितम्। तेषां प्रशासनकाले विद्यापीठे नैकानि अभिवृद्धिकार्याणि सञ्जातानि। विशिष्य विद्यपीठस्य कृत्स्नमपि प्रङ्गणं शोभयमानेनालङ्कृतम्। तदर्थं सुन्दरवनानि प्रकल्पयामास। विद्यर्थिनां कृते नूतनछत्रवासाः विभिन्नक्रीडानां प्रोत्साहनार्थं अन्तर्दौवारिक-क्रीडाप्राङ्गणस्य(**Indoor Stadium**) शङ्कुस्थापनम्, नूतनप्रशासन-भवनस्य (**Administrative Building**) निर्माणमित्यादीनि विनूत्नकार्याणि निरवहन्। तथैव विद्यापीठस्य समग्रदेशे प्रसिद्धये भारतसर्वकारस्य विश्वविद्यालया-नुदानायोगस्य -(**MHRD-UGC**) सहकारेण साहित्यव्याकरणन्यायागमविशिष्टाद्वैतवेदान्तादिविभिन्न-शास्त्रेषु विशिष्ट पण्डितानां नियुक्तिं चक्रुः। तथैव प्रशासननिर्वहणार्थं विभिन्नशाखासु बहूनां कर्मचारिणां (**non-teaching staff**) योग्येषु स्थानेषु नियामकमकार्षुः। तेषां संख्या प्रायशः शताधिकं भवत्येव। श्रीरघुनाथाचार्याणां कार्यनिर्वहणसमये 1995वर्षे विद्यापीठस्य **प्रथमः स्नातकोत्सवः** 1stConvocation) निर्व्यूढम्। तस्मिन्नेव वर्षे 1995ओडिशाराज्यस्य मुख्यमन्त्रिभ्यः संस्कृतपण्डितेभ्य आचार्य जनकी वल्लभपट्टणायकमहोदयानामाध्यक्ष्ये प्रथमतया सङ्गणक-यन्त्रविभागः(**Computer-Lab**) प्रारम्भं चक्रुः। विद्यापीठस्य सर्वतोमुखाभिवृध्यर्थं श्रीरघुनाथाचार्याः महतीं श्रममूढ्वा नैकान्नूतन-तथ्यानाविष्चक्रुः। विद्यापीठस्य कुलपतिपदमतीर्या 1999तमे वर्षे तिरुमलतिरुपतिदेवसथानानां साहाय्येन **Centre for Higher Vedic Studies** इति सुप्रसिद्धां परियोजानायाः निदेशकपदमूढ्वा संस्कृतान्ध्राङ्ग्लभाषासु वेदेषु विद्यमानानां सर्वविधांशानां परकाशनमकार्षुः। सन्दर्भेऽस्मिन् बहूनां ग्रन्थानां प्रकाशनमकार्षुः।

रघुनाथाचार्याणां संस्कृतसाहित्ये कृता सेवा चिरस्मरणीया विराजिता। विशिष्य तेषां मर्गदर्शने दशाधिकाः छात्राः विद्यावारिधिमकार्षुः। तत्रापि न्यायशास्त्रे एकः, पाञ्चरात्रगमशास्त्रे द्वौ विशिष्टाद्वैते त्रयः छात्राः विद्यावारिधिरुपाधिं तथैव विशिष्टाचार्य इत्युपाधिं पाञ्चरात्रागमे एकः, विशिष्टाद्वैत -वेदनते त्रयः वेदेषु त्रयः छात्राश्च उपाधिमलभन्त।

श्रीरघुनाथाचार्याः वहूनां ग्रन्थानां प्रकाशनमकार्षुः। विशिष्य स्तोत्रेषु दशावतारसुप्रभातम् (1976), कोदण्डरामसुप्रभातम्, ललितासहस्र-नामवैभवम्, नरसिंहदेशिकाह्निकम्, मणिञ्जूषा, जननी जन्मभूमिश्च इत्यादीनि, कादम्बिनी, पुष्करवेणी, इति साहित्ये, आन्ध्रभाषायां आर्षविज्ञान -सर्वस्वमिति आरण्यकसंहिताब्राह्मणानां निरूपकविशेषाः तत्त्वदीपिका, सप्तपदी, पाञ्चरात्रे सकल–देवता पूजाविधानम्, देवालयः, क्रियाकैरवचन्द्रिका, महोत्सवविधिः, अस्माकं समस्यानां भगवद्गीतायाः परिष्काराः देवालयनित्यार्चनाविधिः, भारतीयसंस्कृतिः सौन्दर्यसुषमा, श्रीनिवासबाल -भारती, **Studies in Ideology** इत्यादि बहून् ग्रन्थान् रचयामासुः।

एवञ्चातिरिक्तानुशासनिकविषये रघुनाताचार्याणां प्रतिभा निरुपमाना विरजते। संस्कृत -भाषायाः अभिवृध्यर्थं देशे विभिन्नराज्येषु विशिष्य देहली, राजस्थान कोलकत्ता इत्यादिराज्येषु तथैव नेपाल-माल्दी- इटली- अमॆरिका- केनडा- जर्मनी-फ्रान्सादिविदेशेष्वपि संस्कृतभाषायाः प्रचारे प्रसारे च बद्धकङ्कणा आसन्। आकाशवणी दूरदर्शनादिमाध्यमेषु शताधिकानुपन्यासान् विभिन्न -शास्त्रीय- विषयेषु आन्ध्राङ्ग्लसंस्कृतमाध्यमेषु प्रदत्तवन्तः। श्रीरघुनाथाचार्याः विशिष्टपुरस्कारनपि अवापुः।

1996वर्षे आन्ध्रप्रदेशसर्वकारेण उगादिविशिष्टपुरस्कारः,
1993वर्षे चेन्नै तेलुगु अकाडमी संस्थया उगादिविशिष्टपुरस्कारः,
1994 तमे वर्षे हैद्राबादुननगरस्थशिवानन्दविद्यासंस्था द्वारा उत्तम-विशिष्टपुरुषपुरस्कारः (**Sivananda Eminent citizen Award**)
1996 तमे वर्षे इण्डोरुपट्टणे श्रीनरहरिगुरुवैदिकसंस्थया विशिष्टवैदिकपुरस्कारः,
1996वर्षे भारतराष्ट्रपतिना श्रीशङकरदयालशर्ममहभागागानां करकमलभ्यां राष्ट्रपतिपुरस्कारः 1997वर्षे कानपूरनगर **International Bhagavadgeetha Society** संस्थया वैदिकपुरस्करः,
1998तमे वर्षे नवदेहली साहित्य अकाडमी संस्थाद्वारा कलकत्ता विश्वविद्यालयः
रवीन्द्रभारती, विश्वभारती विश्वविद्यालयः- कलकत्ता, बनारस हिन्दू विश्वविद्यालयः, बोद्धसंस्था - सारनाथः इत्यादिषु संस्थापि नैकान् पुरस्कारान् प्रापुः।

श्रीरघुनाथाचार्याः 1994-1999 मध्यकाले प्रायशः बह्वीषु संस्कृतसंस्थासु तथा विश्व-विद्यालयेषु तथा धार्मिकसंस्थासु च विभिन्नेषु सुप्रसिद्धवैष्णवाश्रमविभगेषु गौरवसभ्यत्वेन (**Honourable Member**) भागमन्वगृह्णन्।

तथैवाचार्याः संस्कृतान्ध्राङ्ग्लहिन्दीभाषासु एवं न्यायमीमांसावेद-विशिष्टाद्वैतवेदान्तपाञ्चरात्रादि बहुविधशास्त्रेषु प्रायशः पञ्चाशदधि-कैकशताधिकानि शोधपत्राणि तथा व्यासाश्च विश्वविद्याल-यानुदानायोगेनामोदितासु सुप्रसिद्धासु संस्कृतपत्रिकासु विशेषरूपेण प्राकाशिषुः। एवं सताधिकासु संङ्गोष्ठीषु उपन्यासपाण्डितीप्रकर्षं प्रकटीचक्रुः। श्रीमतामाचार्याणां वैभवमत्र किञ्चिदिवात्र प्राकाश्ये।

पुस्तकानां नामानि यथा –

1. दशावतारसुप्रभातम् 1976,

2. ऋग्वेदमु (197)

3 कादम्बिनी (1974)

4सकलदेवतापूजाविधानम् (1976)

5 सूक्तिमुक्तावलिः(1979)

6 देवालयः (1979)

7.अस्माकं समस्यानां भगवद्गीतायाः परिष्कारः

8 सुवर्णपुष्पमाला(1980)

9 श्रीकोदण्डरामसुप्रभातम् (1980),

10 क्रियाकैरवचन्द्रिका,

11 ललितासहस्रनाम,

12 आर्षविज्ञानसर्वस्वम् - वेद संहिताः (1982)

13आर्षविज्ञानसर्वस्वम् - 2 ब्राह्मणानि (1986)

14 श्रीवेङ्कटाचलमाहात्म्यम्,

15 पुष्करवेणी (1980),

16 तत्वदीपिका (1981)

17 . जननी जन्मभूमिश्च(1985),

18 सप्तपदी (1985)

19 महोत्सवविधिः

20 नरसिंहदेशिकाह्निकम्

21 देवालयनित्यार्चनाविधि,

22 सौन्दर्यसुषमा (1988)

23 भारतीयसंस्कृति (1994)

24 आर्षविज्ञानसर्वस्वम् - आरण्यकानि (1993)

25 श्रीनिवासबालभारती

26 मणिमञ्जूषा (1992)

27 Studies In Indology इत्यादीनि

पुस्तकरत्नानि आविष्कुर्वन्। गुरवः आचार्य रघुनाथाचार्याः अन्येषां रचयित्रूणां ग्रन्थानां कृते आमुख रूपेण प्रायशः शताधिकग्रन्थानां कृते स्वाभिप्रायानाविष्चक्रुः। आचार्य रघुनाथाचार्याः इतराचार्याणां ग्रन्थानां विवरणविषये प्रायशः द्विषाताधिकग्रन्थानां स्वाभिप्राय-मरिप्रकटयन् तेषां ग्रन्थानां, ग्रन्थकतॄणां मङ्गलाशासनमकुर्वन्।

मार्गनिर्देशकानुभवः(**Research Guidence**)

आचार्य श्रीमद्भागवतं रघुनाथाचार्याणां मार्गनिर्देशने षट्शोधछात्राः विद्यावारिधिः उपाधिमलभन्त।

D Narasimha Reddy
Topic-- A Study of Yogapada of Padmasamhita with special refernce to Patasnjala yagadarsana.
2. Panduranga vithal
Topic -- A Study of Kalapurna STG Varadacharya 's works.
3. P P V D Naga Trisulapani
topic --- Viswanatha's Nyaya sutravrtti A critical study.
4. S B S Battacharya
Topic - Kriya in Pancharatra and Vaikanasagama :A critical study.
5.C Lalitha Rani
Topic -- A study of Venkatachalamahatmam withn special reference to Varaha and Bhavishottarapuranas.
6.K Rajagopalan
Topic -- A study of Pancastavi with special reference to Visistadvaita Philosophy.
एवं षण्णां विद्यार्थिनां कते आचार्याः मार्गनिर्देशनमकुर्वन्।

1.5 विशिष्टाचार्यः (M. Phil Degree)

D Narasimha Reddy-
A study of some Minor Temple Festivas according to Pancharatra and Vaikanasa Agamas.
2. T V K Srinivasan -
- Srigunaratna kosa A study.
3. Y Padmasri
A study of some impartant Suprabhata stotras of Andhra Pradesh with special reference to Srivenkateswara Suprabhatam.

रीत्या त्रयाणां विद्ययार्थिनां विशिष्टाचार्य (ग् घ्ण्त्थ्) उपाधिं मार्गदर्शनमाचार्यैः कृतम्

1.ऋग्वेदस्य आनन्दतीर्थभाष्यस्य श्रीराघवेन्द्रयतिनः मन्त्रमञ्जरीति परिशोधात्मकग्रन्थं प्रचुरणमकुर्वन्।

2. आर्षविज्ञानसर्वस्वम् इति दशभागयुतग्रन्थः।

तत्र प्रथमभागः वेदः-संहिताः, 2 ब्राह्मणानि, 3 आरण्याकानि, 4 उपनिषदः, 5 वेदभाष्यम्, 6 श्रौतगृह्य धर्मसूत्राणि 7.पाञ्चरात्र 8.वैखानस 9.वास्तु 10.शिल्पेत्यादिभागानां सम्पादक रूपेणासन्।

3.वेङ्कटेश्वरस्वामिनःजीवनचरित्रे परिशोधात्मकं विभागे वेङ्कटेश्वर-जीवनमाहात्म्यमुद्दिश्य दशभागेषु आन्ध्रतमिलकन्नडमलयालमराठी-ओरियाबेङ्गालीहिन्दीगुजरातीति दशसु भाषासु ग्रन्थरचनां चक्रुः।

**अतिरिक्तानुशानविधयः(Extra curricular activites)**

1.तिरुमलतिरुपतिदेवस्थानपरिशोधनविभागस्य उपकार्यविर्वहणीधिकारिरूपेण सेवामकुर्वन्।

2. संस्कृतभाषायाः अभिवृध्यर्थं आकाशवाण्यां विजयवाडा, कडप, तिरुपतिकेन्द्रेषु बहुवारं प्रचारमकुर्वन्।

3 नवदेहल्यां विद्यमानस्य संस्कृतप्रतिभा , साहित्य अकाडमी संस्थायाः सम्पादकरूपेण कार्यमकुर्वन्।

1.7. विदेशीपर्यटनविशेषाः (Countries visted)

संस्कृतभाषायाः प्रचारसिध्यर्थं नेपाल्, इटली, माल्टा,अमेरिका, केनडा इत्यादि विविधदेशेषु सभासु भागं गृहीत्वा प्रचारमकुर्वन्।

पुरस्काराः (Awards)

1. 1993तमे वर्षे मद्रपुरीस्थ तेलुगु अकाडंमी द्वारा उगादिपुरस्कार आचार्यैः प्राप्तम्।

2.1994 तमे वर्षे हैदराबादीय शिवानन्दविद्यासंस्थद्वारा उत्तमविशिष्टपुरुषः (Sivananda Eminent Citizen Award) इति पुरस्कारः प्राप्तः।

3.1996तमे वर्षे इन्दोर् पट्टणे नरहरगुरु वैदिकाश्रमसंस्थद्वारा वैदिकपुरस्कारः इति पुरस्कारभाजिनः सञ्जाताः।

4.1996 तमे वर्षे आचार्य रघुमनाथाचार्याः राष्ट्रपतिपुरस्कारः इति His Excellency शङ्कर -दयालशर्म महोदयैः करकमलाभ्यां पुरस्कारभाजिनः सञ्जाताः।

5. 1997 तमे वर्षे अन्तर्जातीयगीतासंस्थासभायां कान्पूर् नगरे पुरस्कारभाजिनः अभवन्।

## Honours & Recognition

1.1995वर्षे नवदेहली मध्ये स्थीयमानस्य त्तक्त कृत्तालम् पीठाधिपतिस्वामिना आचार्यान् श्रीपाञ्चरा त्रागमरत्न इति नाम्ना पुरस्कृतवन्तः।

2. आचार्य रघुनाथाचार्यैः भारतप्रभुत्वाधिकारिभिः 2001 वर्षे त्तङ्क् द्वारा पुरस्कारः फलकम् प्राप्तम्।

3.साहित्य अकाडमी, नवदेहली द्वारा कलकत्ता विश्वविद्यालयः, रवीन्द्रभारती, विश्वभारती विश्वविद्यालयः-कलकत्ता, बनारस् हिन्दू विश्वविद्यालयः- बनारसः, बोध्दसंस्था-सारनाथ क्षेत्राणि सन्ददर्शुः।

4.नवदेहल्यां विद्यमानयाः "भारतीय जनपथ" संस्थायाः कार्यसभ्यत्वरूपेण स्थित्वा तेषां पाण्डित्यप्रतिभया तस्याः संस्थायाः सेवामकुर्वन्।

5.नवदेहल्या विद्यमानायाः रामकृष्णदाल्मिया श्रीवाणी निवास इत्याख्यस्य संस्थायाः कार्यसभ्यत्वेन भूत्वा वहुधा स्वपाण्डित्य प्रकाण्डया मार्गदर्शनमकुर्वन्।

6. नवदेहल्यां विद्यमानायाः बिर्वा पुरस्कार इत्याख्यास्य संश्थायाः कार्यसभ्यत्वेन स्थित्वा मार्गदर्शनं कुर्वन् बहुसेवां चकार।

7. नवदेहल्यां साहित्य अकाडमी संस्थायाः कार्यसभ्यत्वेन भूत्वा स्वीय बुध्या बहुसेवामकुर्वन्।

8.तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालये Acadamic Senete संस्थायाः कार्यसभ्यत्वेन संस्थायाः वर्धनमकुर्वन्।

9.तिरुमलतिरुपतिदेवस्थानस्य विसिष्ठव्यक्तीनां विभागाध्यक्ष-रूपेण सेवामकुर्वन्।

10.तिरुमलतिरुपतिदेवस्थानधर्मप्रचारपरिषदः कार्यदर्शित्वेन संस्थायाः बहुसेवामकुर्वन्।

11.केरलराष्ट्रे विद्यमानस्य श्रीशङ्कराचार्य महाविश्वविद्यालयस्य छक्कक् विभागस्य सभ्यः भूत्वा मार्गदर्शनं कृत्वा सेवामकुर्वन्।

12.केरलराष्ट्रे कालटि ग्रामे विद्यमानस्य शङ्कराचार्य विश्वविद्यालयस्य कुलपतीनां चयनविभागे कार्यसभ्यत्वेन स्थित्वा मार्गदर्शनमकुर्वन्।

13.काञ्चीपुर्यां विद्यमानस्य श्रीचन्द्रशेखरसरस्वती महाविश्व-विद्यालयस्य कुलपतीनां चयनविभागे कार्यसभ्यः भूत्वा मार्गदर्शनमकुर्वन्।

13.काञ्चीपुरीस्थ श्रीचन्द्रशेखरसरस्वतीमहाविश्वविद्यालये कुल-पतिपदवीचयने सभ्यश्चासन्।

### 1.10 Membership in Professional Bodies

1994तः 1999 मध्यकाले तिरुपतिस्थ राष्ट्रियसंस्कृविद्यापीठे कुलपतिरूपेण विराजमानसमये श्रीरघुनाथाचार्याः नवदेहलीस्थ राष्ट्रियसंस्कृतविद्यापीठे, राष्ट्रियसंस्कृत -संस्थाने, तमिलनाडुदेशे श्रीचन्द्रशेखरसरस्वतीमहाविश्वविद्यालये, नवदेहलीस्थ महर्षि-सान्दापनी वेदविद्याप्रतिष्ठाने च कार्य परिषत्सु सभ्यत्वं निरवहन्। एवं नवदेहलीस्थ क्ष्क्छ्ङ संस्थायांप्रकरणपञ्चिकायाः विषये क्रियमाणायं सङ्गोष्ठ्या कार्यदर्शित्वं चकार।

### 1.11.देशीयविदेशीयसङ्गोष्ठ्यादीनि(International &National Conferences and Semiars)

आचार्य श्रीमद्भागवतं रघुनाथाचार्याः देशीयविदेशीयसङ्गोष्ठीषु साहित्यव्याकरण न्यायदार्शनि कागममीमांसावैशेषिकाद्वैतविशिष्टा-द्वैतादि नैकेषु शास्त्रेषु शताधिकान् पत्रान् समप्र्य पुनसितत्रैव विभिन्नेषु सत्रेषु निर्वाहकपदवीषु च भागमन्वगृण्हन्।केचनात्र स्थालीपुला-कन्यायेन प्रस्तूयन्ते।

1.1976तमे वर्षे कर्णाटकीये धारवाडनगरे अखिलभारतीय-प्राच्यसङ्गोष्ठी सप्तविंशतितमे सत्रे दिङ्नागोक्तहेत्वाभासविमर्शः इत्यमिन् विषये सम्यगमभाषयन्।

2.तस्मिन् वर्षे तिरुपतिनगरे षष्ठमाखिलभारतीयसङ्गोष्ठ्या प्रेत्यभावविरणमित्यस्मिन् विषये निजपत्र समर्पमकार्षुः।

3.1976तमेवर्षे तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालये न्यायविभागे अखिलभारतीयन्याय -विभाग संस्थायां उपन्यस्ताः।

4.1977तमे वर्षे तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालये आयोजि-तायां तत्त्वशास्त्र -परियोजनायां सभ्यत्वेन भागमन्वगृण्हन्।

5.1978तमे वर्षे विशाखपट्टणे वालतेरु आन्ध्राविश्वविद्यालये पण्डितराजजगन्नाथस्य विषये सङ्गोष्ठ्या पण्डितराजस्य शास्त्रपाण्डित्यमित्यस्मिन् विषये सुष्टूपन्यस्ताः।

6.तस्मिन्नेव वर्षे पुण्यपट्टणे (घ्दद्ङ्क) अखिलभारतीयप्राच्य-सङ्गोष्ठ्या अपि मीमांसकाः मनोवैभववादिनः इत्यस्मिन् विषये सम्यगुपन्यस्ताः।

7.1979 तमे वर्षे तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालये मीमांसकानां दृष्ट्या व्याप्तिः व्याप्तिग्रहोपायाश्च इत्यस्मिन् विषये पत्रसमर्पणं चक्रुः।

8.तस्मिन्नेव वर्षे विशाखपट्टणे वालतेरु आन्ध्राविश्वविद्यालये अन्ध्रप्रदेशीय प्राच्यसङ्गोष्ठ्या द्वितीयसत्रे भागमन्वगृण्हन्।

9.1980तमे वर्षे तिरुपस्थ तिरुमलतिरुपतिदेवस्थानेनायोजिते आन्ध्रदेशे प्रकाशनमित्यस्मिन् विषये जातीयसंङ्गोष्ठ्या पत्रं समर्पयामासुः।

10.तस्मिन्नेव वर्षे कलकत्तानगरस्थ शान्तिनिकेतनसंस्थायां अखिल-भारतीयसंगोष्ठ्या अपि सादृश्यमेव मीमांसकानामपि पदार्थान्तर-मित्यस्मिन् विषये पत्रसमर्णमकार्षु।

11.1981तमे वर्षे अखिलभारतीय शैव्यसंस्थया तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालये मीमांसकानां दृष्ट्या व्याप्तिः व्याप्तिग्रहोपायाश्च इत्यस्मिन् विषये पत्रसमर्पणं चक्रुः।

12.1982तमे वर्षे आन्ध्रमहाकविः पोतनविषये आयोजितायां राष्ट्रियसङ्गोष्ठ्यां पोतनस्य पञ्चशती इत्यस्मिन् विषये पत्रसमर्पणमकुर्वन्।

13.तस्मिवर्षे तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालये रसगङ्गारग्रन्थे राष्ट्रिय संगोष्ठ्या उपन्यस्ताः।

14.जयपूरुनगरे अखिलभारतीयप्राच्यसङ्गोष्ठ्या एकर्तिं्र-शतितमे सत्रे ऋग्वेगे स्त्रीणामधिराः एकं समीक्षणमित्यस्मिन् विषये निजपत्रं प्रादर्शयन्।

15.1983तमे वर्षे तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालये आनन्दवर्धनस्य ध्वनिसिद्धान्त विषये ध्वनायालोकग्रन्थमुद्दिश्य समयगुपन्यस्ताः।

16.1984तमे वर्षे तिरुपतिस्थ श्रीवेङ्कटेश्वरविश्वविद्यालये नाट¬शास्त्रेआयोजितायांराष्ट्रिय संङ्गोष्ठ्या नाट¬शास्त्रीयमुख्य-विशेषानुद्दिश्य पत्रसमर्पणं चक्रुः।

17.1985तमेवर्षे राजस्थानराज्यस्य जयपूरपट्टणे अखिलभारतीय-संस्कृतसङ्गोष्ठ्या भागमकुर्वन्।

18.1997तमे वर्षे बेङ्गुलूर् नगरे अखिलभारतीयागममहासभायां परिशोधन ग्रन्थे पाञ्चरात्रे वैदिकमन्त्र विनियोगाः इति विषयः प्रकाशितः।

19.तस्मिन्नेव वर्षे चन्नपुरीस्थ श्रीरामानुजवाणि त्रैमासिकी-पत्रिकायां पाञ्चरात्रे महोत्सवविधिः लघुटीका इत्यंशः प्रकाशितः।

20.1989तमे वर्षे तिरुपतिस्थ चिन्मयानन्दसंस्थायाः ज्ञानयज्ञ-मित्यस्यां पत्रिकायां शरीरशरीरिभावहेतवः इत्ययमंशः प्रकाशितः।

21. 1979तमे वर्षे हैदराबादुनगरस्थ उस्मानिया विश्वविद्यालये मल्लिनाथस्य सङ्गोष्ठ्या मल्लिनाथस्य मीमांसाशास्त्र-पाण्डित्यस्मिन् विषये पत्रसमर्पणं चक्रुः।

22.1972 तमे वर्षे अलहाबादपट्टणे केन्द्रियसंस्कृतविद्यापीठे गङ्गानाथ झामहोदस्य पत्रिकायां अष्टाविंशतितमे विभागे अन्नम्भट्टः इत्यंशः प्रकाशितः।

23.1973तमे वर्षे अलहाबादपट्टणे केन्द्रियसंस्कृतविद्यापीठे गङ्गानाथ झामहोदस्य स्मारकपत्रिकायां विष्वक्सेनविषये पाञ्चरात्रवैखान-सयोर्मतबेधाः इत्यंशः प्रकाशितः।

24. 1972 तमे वर्षे मैसूरुनगरे सुधर्मपत्रिकायां वात्स्यायनः इत्ययमंशः प्रकाशितः।

25. 1970तमे वर्षे तितिदे सप्तगिरिपत्रिकायां पाञ्चरात्रे प्राणायाम इत्ययमंशः प्रकाशिकः।

26. 1973तमे वर्षे गुण्डूरुनगरे आगमसङ्गोष्ठ्या विग्रहाराधनम् एकमध्ययमनमित्ययमंशः प्रकाशितः।

27.1972तमेवर्षे परमहंसपरिव्राजकाचार्यैः श्रीश्रीश्री त्रिदण्डिराम-नुजपेद्दजीयर् स्वामिभिः सञ्चालिके श्रीलक्ष्मीनारायणमहायज्ञ-सम्बन्धिकायां पत्रिकायां पाञ्चरात्रप्राशस्त्यमित्ययमंशः प्रकाशितः।

28.1966वर्षे हैदराबादनगरस्थ देवालयवाणी पत्रिकायां पाञ्चरात्रप्राशस्त्यांशः प्रकाशितः।

29.1966तमे वर्षे हैदराबादनगरस्थ देवालयवाणी पत्रिकायां अर्चकप्राशस्त्यमित्ययं विषयः प्रकाशितः।

30.1966तमे वर्षे हैदराबादनगरस्थ देवालयवाणी पत्रिकायां अपचारविचारः इत्यस्मिन्नंशे उपन्यस्ताः।

31. 1963तमे वर्षे आराधना इत्यस्मिन् पत्रिकायां रामदस्य विषये विवरणमित्ययमंशः प्रकाशितः।

32.1979तमे वर्षे सद्गुरुवाणी पत्रिकायां आगमदर्शनमित्यनया शीर्षिकया पुस्तकं प्रकाशितम्।

33. तस्मिन्नेव वर्षे सद्गुरुवाणी पत्रिकायां हैन्दवसंस्कृतिः इति विषये उपन्यस्ताः।

34.1979वर्षे विशाखपट्टणे वालतेरु आन्ध्राविश्वविद्यालये नागार्जुनस्य प्रतीत्यसमुत्पत्ति -वादविषये उपन्यस्ताः।

35.1979तमे वर्षे सद्गुरुवाणी पत्रिकायां आगमशास्त्रेषु आचार्यस्वरूपमित्यस्मिन् विषये उपन्यस्ताः।

36.1980तमे वर्षे सद्गुरुवाणी पत्रिकायां आगमेषु भूपरीक्षाविधिः इतिविषये उपन्यस्ताः।

37.1975तमे वर्षे विश्वहिन्दूपत्रिकायां आन्ध्ररत्नानीति नाम्ना कार्यक्रमः निरवहन्।

38.1973तमे वर्षे कणादस्य वैशेषिकदर्शमित्ययं विषयः जागृतीपत्रिकायां प्रकाशयन्।

39.1971तमे तितिदे तिरुपतिद्वारा वर्षे मोक्षभीम इत्ययं विषयः सप्तगिरिपत्रिकायां प्राकाशयन्।

40.तस्मिन्नेव वर्षे तितिदे द्वारा वर्षे धर्ममूलमिदं जगदित्ययं विषयः सप्तगिरिपत्रिकायां प्राकाशयन्।

41.1972 वर्षे तितिदे द्वारा रामायणे रत्नानि इत्ययं विषयः सप्तगिरिपत्रिकायां प्राकाशयन्।

42.1982 तमे वर्षे राजस्थानस्थ जयपूरे एकर्तिं्रशत्तमे अखिलभारतसंस्कृतसंङ्गोष्ठ्या नयविधिः एकं विमर्शनमित्यस्मिन् विषये पत्रसमर्पणं चक्रुः।

43.1984 तमे वर्षे व्याससाहिती संहितापत्रिकायां श्रीमद्भगवद्गीता पत्रं प्रकाशयामासुः।

44.1998तमे वर्षे देहलीस्थ रा.सं.विश्वविद्यालये Contribution of Sanskrit to Freedom struggle and National Awareness Indian Freedom Movement इति विषये समायोजितायां राष्ट्रिय सङ्गोष्ठ्या पत्रसमर्पणं चक्रुः।

45.1998तमे वर्षे वारणासीस्थ महर्षिसान्दीपनिवेदविद्याप्रतिष्ठाने आपस्तम्भश्रौतसूत्रपरिशीलन मित्यस्मिन् विषये पत्रं समर्पयामासुः।

46.तस्मिन्ननेव वर्षे देहलीस्थ कुन्दकुन्दभारतीसंस्थायां सौरशेनी-प्रकृतिः इत्यस्मिन् विषये
आयोजितायां जातीयसंगोष्ठ्या प्राकृतप्रशस्तिः इति विषये पत्रसमर्पणमकार्षुः।

47.तस्मिन्नेव वर्षे नेपालराज्यस्थ खाट्मण्डुनगरे भारतरय-बालकार्यालयेन एवं महेन्द्रसंस्कृत -विश्वविद्यालयेन च संयुक्तरूपेणा-योजितायां अन्तर्राष्ट्रियसंस्कृतसंगोष्ठ्या संस्कृतक्षेत्रे भारतनेपालदेशयोः सम्बन्धाः इत्यस्मिन् विषये पत्रसमर्पणं चक्रुः।

48.1997तमे वर्षे पाण्डिच्चेरीपट्टणे ICPR, Pondicherry (UT) संस्थयाऽयोजितायां शास्त्र-परियोजनायां शास्त्रदीपिकायाः तर्कपाद-विवरणमित्यस्मिन्नंशे उपन्यस्ताः।

49.1998तमे वर्षे नवदेहल्यां राष्ट्रियसंस्कतसंस्थानद्वारा प्रचालिते स्वातन्त्र्योद्यसंग्रामे संस्कृतस्य प्रामुख्यमित्यस्मिन् विषये समभाषयन्।

50.1994वर्षे मैसूरुविश्वविद्यालये 1995तमे वर्षे दाक्षिणप्रान्तीय-कुलपतीनां संगोष्ठ्या भगमन्वगृण्हन्।

51. 1994वर्षे पुण्यपत्तने(Pune) एवं मणिपालराज्ये 1995वर्षे च अखिलभारतीयकुलपतीनां समावेशे Accountability and Accrediation of Hogher-learning इत्यस्मिन् विषये उपन्यस्ताः।

52.1993तमे वर्षे तिरुपतिस्थ श्रीसत्यसायीधार्मिकसंस्थायां (Science and Spirituality) इत्यस्मिन् विषये भषणमददन्

53.1996वर्षे मार्चमासे मालटादेशे Commomwealth Universities Assossiation

संस्थाया Conference of Executives Heads इति समावेशे भागमन्वग्रह्णन्।

54.1997वर्षे प्रपञ्चसंस्कृतसदसि प्रधानकार्यदर्शिरूपेण कार्यमकुर्वन्।

55. 1992तमे वर्षे तिरुपतिनगरे तिरिमलतिरुपतिदेवस्थानेन महता संरम्भेण जनवरीमासे 29 दिनाङ्कादारभ्य फिब्रावरी तृतीयदिनाङ्कपर्यं षड्दिनपर्यन्तमायोजिते वेदाः तथा शास्त्राणी - त्यस्मिन् जातीयसंगोष्ठ्या कार्यदर्शीरूपेण सिंहभागमूढ्वा गोष्ठ्याः महत्तरं स्थानमलभन्त। संगोष्ठ्यामस्यां प्रायशः द्विसहरुसंख्याकाः वैदिकपण्डिताः भागग्रहणं चक्रुः। सुप्रसिद्धाः विद्वांसः समागताः। तेषु प्रो.रमारञ्जनमुखर्जी,प्रो.मण्डनमिश्रः, प्रो.इन्द्रनाथचौदरी, प्रो.वेङ्कटा-चलम्, प्रो.नावलपाक्कं रामानुज ताताचार्याः, प्रो.ङक् द्विवेदी, प्रो.आर्. राममूर्तिशर्म इत्यादयः प्रसिद्धः मुख्यभागमूढ्वा निजकुश्चिका भाषणानि अन्वगृह्णन्। विभिन्नेभ्यप्रान्तेभ्यः विविधसम्प्रदायिनः मठाधिपतयः, योगिपुङ्गवाः सगोष्ठ्या मस्यां भागमूढ्वा सर्वेभ्यः शीर्भिरनुगृहीतवन्तः। तथैव भातदेशस्य उपराष्ट्रपतिवर्येभ्यः श्रीमन्तः शङ्करदयालशर्ममहोदयेन इयं संगोष्ठी उद्घाटिता एवमान्ध्यप्रदेश मुख्यमन्त्रिवर्येण समापनोत्सवे उपन्यस्ताश्च। तथैव वेदवेदाङ्गेषु कतिपयशास्त्रेषु नानाविधैः विद्वद्भिः उसन्यस्ता बभूवुः। अस्याः सङ्गोष्ठ्याः निर्वहणं आचार्याणां रघुनाथाचार्यां जीवने एकं चारित्रकस्मृति (त्त्त्द्मद्यदृद्धत्ड्ठथ् कध्ड्डद्य)रभवत्। तथैव भारतदेशे अद्यावधि इयं सङ्गोषी

निर्वहणं नान्यत्र दृष्टमिति विद्वद्भिः ऐककण्ठ¬ेन प्रकीर्तितम्।

धार्मिकोपन्यसाःसाःEndowment Lectures

1.1995वर्षे मद्रास् नगरे मद्रास् विश्वविद्यालये गुरवय्यशेट्टि धार्मिकसंस्थाया वेदान्तविषय -मुररीकृत्य भाषणमन्वगृह्णन्।

2. कलकत्ता नगरे जादवपूर् विश्वविद्यलये आचार्य चित्तहरन् चक्रवर्त्ती बिनलादेव्योः धार्मिकसंस्थायां उद्धानमकुर्वन्। तस्यां सभायां आचार्य रघुनाथाचार्याः भारतीयसंस्कृतौ आध्यात्मविज्ञानप्रभावः (Indian tridition of spiritual Knowiedge) इत्यस्मिन् विषये भागमन्वगुह्णन्।

3.1996 तमे वर्षे वारणास्यां सम्पूर्णानन्दसंस्कृतविश्वविद्यलये पूर्वमीमांसायां विधिवादः इत्यस्मिन् विषये उपन्यस्ताः।

1.13.(Assosiated with Acadamic Institutions in Different Capacities)

1.अमरिकादेशे छापल् हिल्पट्टणे उत्तरकरोलिनाविश्वविद्यालये तान्त्रिकविद्यासंस्थायां सभ्यत्वेन विजायन्ते।

2.नवदेहलीस्थ इन्दिरागान्धी जातीयकलापरिषदि मुख्यसभ्यत्वेन विराजन्तः।

3.ह्मषीकेशपट्टणे Hindu Heritage Research Foundation संस्थायां गौरवसभ्यत्व -मलङ्कुर्वन्।

4.वारणासी बनारस हिन्दू विश्वविद्यालये विद्वद्परिषदि सभ्यत्वेन विराजमाना आसन्।

5.वारणासीस्थ सम्पूर्णानन्दसंस्कृतविश्वविद्यालये चण्डीघरराज्ये पंजाबविश्वविद्यालये सभ्यत्वेन विराजमाना आसन्।

6. विद्वद्परिषदि सभ्यत्वेन विराजमाना आसन्।

7. मसूरुविश्वविद्यालये सभ्यत्वेन विराजमाना आसन्।

8. पाण्डिच्चेरी विश्वविद्यालये सभ्याश्चासन्।

9.विशाखपट्टणे वालतेरु आन्ध्रविश्वविद्यालये, सभ्यत्वेन विराजमाना आसन्।

10. वेङ्गलूरु विश्वविविद्यालये सभ्यत्वेन विराजमाना आसन्।

11.प्रशान्तिनिलयं पुट्टपर्ति श्रीसत्यसाई उच्चविद्याकलाशालासभ्य आसन्।

12.कृष्णदेवरायविश्वविद्यालये अनन्तरूपनगरे सभ्यत्वेन विराजमाना आसन्।

13.नवदेहल्यां राष्ट्रियसंस्कृतसंस्थाने सभ्यत्वेन विराजमाना आसन्।

14.गुण्डूरनगरस्य नागार्जुनविश्वविद्यालये सभ्यत्वेन विराजमाना आसन्।

15.हैदराबादनगरे पोट्टिश्रीरामुलु विश्वविद्यालये सभ्यत्वेन विराजमाना आसन्।

16. मदास् विश्वविद्यालये सभ्यत्वेन विराजमाना आसन्।

17.मोलकोटे संस्कृत अकाडमिसंस्थायां सभ्यत्वेन विराजमाना आसन्।

18.पूरीनगरे श्रीजगन्नाथसंस्कृतविश्वविद्यालये सभ्यत्वेन विराजमाना आसन्।

19.नवदेहल्यां श्रीतातबहदूरशास्त्री राष्ट्रियसंस्कृतविद्यापीठे सभ्यत्वेन विराजमाना आसन्।।

20.कोलकत्तापट्टणे भारतीयभाषापरिषदि सभ्यत्वेन विराजमाना आसन्।।

21.कोलकत्तापट्टणे रवीन्द्रभारतिविश्वविद्यालये सभ्यत्वेन विराजमाना आसन्।

22. नेपालदेशे खाट्मण्डुनगरे पशुपतिलालकेडियपीस संस्थायां सभ्यत्वेन विराजमाना
आसन्।

इत्थं सुरभारतीसमुपासकाः दैवानुग्रहसम्पन्नाः भगवदारधना-वंशसम्भूता आचार्याः श्रीमद्वागवतं रघुनाथाचार्यचक्रवर्तीमहोदयाः संसकृतक्षेत्रस्याविश्रान्ततया निरन्तरसेवामूढ्वा भगवदाज्ञया तिरुपति-क्षेत्रे स्वगृहे 17-09-2002 दिनाङ्के परमात्मनः श्रीवेङ्कटेश्वरस्य दिव्यचरणयोः स्वात्मानं समर्प्य परमपदमवापुः।

*******************

श्रीमन्मारायण चरणौ शरणं प्रपद्ये।

श्रीमते नारायणाय नमः।

*******************